# 2019

## SANSKRIT

## [ Honours ]

## PAPER – I

*Full Marks* : 90

*Time* : 4 hours

*The figures in the right hand margin indicate marks*

*Candidates are required to give their answers in their own words as far as practicable*

*Illustrate the answers wherever necessary*

**1.** यथेच्छमेका कारिका व्याख्येया — 1 × 6

(*a*) संहितैकपदे नित्या नित्या धातूपसर्गयोः ।
समासेऽपि च नित्या स्यात् सा चान्यत्र विभाषिता ॥

(*b*) तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता ।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः ॥

( *Turn Over* )

2. यथेच्छं चतुष्टयस्य आत्मनेपद-परस्मैपदविधान-कारणं ससूत्रं निर्दिश्यताम्— 1 × 4

यजति, अनुकरोति, प्रवहति, आस्ते, दृश्यते, निविशते, पराजयते ।

3. (*a*) यथेच्छं द्वयोः सन्धिः कार्या— 1 × 2

दधि + अत्र, रमा + ईशः, हरी + एतौ, पुनः + रमते

(*b*) द्वयोः सन्धिविच्छेदं कुरुत— 1 × 2

तल्लयः, गवाक्षः, प्रत्यहम्, कस्त्वम् ।

4. निम्नोक्तेषु रेखाङ्कितेषु पदेषु चतुष्टयस्य सकारणविभक्तिनिर्देशः कार्यः— 1 × 4

(*a*) शिशुः चन्द्रं पश्यति ।

(*b*) जटाभिः तापसः ।

(*c*) मह्यम् ओदनं रोचते ।

(*d*) हिमालयात् गङ्गा प्रभवति ।

(*e*) जगतः कर्ता कृष्णः ।

(*f*) चर्मणि द्वीपिनं हन्ति ।

5. केवलं प्रत्ययविधायकं सूत्रमुल्लिख्य यथेच्छं द्वयोः परिनिष्ठितं रूपं लिखत— 2 × 2

(*a*) दशरथ + इञ्

(*b*) पा + सन् + उ

(*c*) पठ् + यङ् + लट् + ते

(*d*) धन + मतुप्

6. यथेच्छं चतुष्टयस्य एकपदीकरणं विधेयम्— 1 × 4

द्रष्टुमिच्छति, आत्मनः पुत्रमिच्छति, उदकं पातुमिच्छति, शब्दं करोति, कर्तुमिच्छसि, सुमित्रायाः अपत्यं पुमान् ।

7. यथेच्छं द्वयोः सविग्रहसमासनाम लिखत— 2 × 2

उपकृष्णम्, राजपुरुषः, वीणापाणिः, पाणिपादम्, अब्राह्मणः ।

8. भट्टिकाव्यस्य द्वितीय-सर्गस्य नाम किम् ? विश्वामित्रेण साकं कथं रामलक्ष्मणौ तपोवनं जग्मतुः ? तपोवनगमनकालीना शारद-शोभा यथाग्रन्थं वर्णनीया । 10

*अथवा*

'दीपतुल्यः प्रबन्धोऽयं शब्दलक्षणचक्षुषाम्' —इत्युक्तेः याथार्थ्यं प्रतिपादयत ।

9. सरलसुरगिरा देवनागरिलिप्या च एकस्य श्लोकस्य व्याख्या कार्या — 6 × 1

(*a*) विम्बागतैस्तीरवनैः समृद्धिं
निजां विलोक्यापहृतां पयोभिः ।
कुलानि सामर्षतयेव तेनुः
सरोजलक्ष्मीं स्थलपद्महासैः ।।

(*b*) दत्तावधानं मधुलेहिगीतौ
प्रशान्तचेष्टं हरिणं जिघांसुः ।
आकर्णयन्नुत्सुकहंसनादान्
लक्ष्ये समाधिं न दधे मृगावित् ।।

10. सरलसुरगिरा देवनागरीलिप्या च चतुर्णामुत्तरं देयम्— 1 × 4

(*a*) भट्टिकाव्यस्य उत्सः कः ?

(*b*) भट्टिकाव्यस्यापरं नाम किम् ?

(*c*) विश्वामित्रः रामचन्द्राय कां विद्यां प्रदत्तवान् ?

(*d*) 'न मानिनी संसहतेऽन्यसङ्गमम्' — इत्युक्तेः तात्पर्यं किम् ?

(*e*) 'प्रतीयिरे श्रोत्रसुखैर्निनादैः' — इत्यत्र के तथाविधेन उपायेन प्रतीयिरे ?

(*f*) तरङ्गसङ्गाच्चपलैः पलाशै-
ज्वालाश्रियं सातिशयं दधन्ति ।
सधूमदीप्ताग्निरूचीनि रेजु-
स्ताम्रोत्पलान्याकुलषट्पदानि ।।
— इत्यत्र कोऽलंकारः ?

**11.** (*a*) उद्धृतपूर्वश्लोकस्थानामधः स्थितानां पदानां यथेच्छं द्वयोः प्रकृतिप्रत्ययं निरूपयत — 1 × 2

तेनुः, समाधिम्, मृगावित् ।

(*b*) एकस्य सविग्रहसमासनाम लेख्यम् — 2 × 1

स्थलपद्महासैः, दत्तावधानम् ।

(*c*) एकस्य सन्धिविच्छेदं कुरुत — 1 × 1

विम्बागतैस्तीरवनैः आकर्णयन्नुत्सुकहंसनादान् ।

**12.** छन्दोमञ्जरीग्रन्थानुसारं यथेच्छं द्वयोः सोदाहरणं लक्षणं प्रतिपाद्यताम् — 5 × 2

वसन्ततिलकम्, वंशस्थवृत्तम्, तोटकम, रुचिरा ।

**13.** अधोलिखितयोः श्लोकयोः एकस्य छन्दः निरूप्यताम् — 5 × 1

(*a*) अर्थो हि कन्या परकीय एव ।

(*b*) अहो हन्ति ज्ञानवृद्धिं विधत्ते ।

14. संस्कृतभाषया देवनागरीलिप्या च एकस्य अनुवादः कार्यः — 10 × 1

(*a*) যতদিন ভারতবর্ষ থাকিবে, ততদিন বিন্ধ্য এবং হিমালয় বিদ্যমান থাকিবে, যতদিন গঙ্গা ও গোদাবরী প্রবাহিত হইবে, ততদিন সংস্কৃতও জীবিত থাকিবে। আমরা দুঃখের সহিত জানাইতেছি যে, ভারতবর্ষের প্রাচীন ইতিহাস স্বল্পই জানা যায়। উহাই অধিকাংশই আমাদের নিকট এখনও অন্ধকারাবৃত।

As long as India will live, as long as the Vindhya and the Himalayas will last, as long as the Ganga and the Godavari will flow, the Sanskrit language will also live. We are sorry to declare that very little can be known about the ancient history of India. Most of it is still dark to us.

(*b*) কোনও এক বনে ভাসুরক নামে একটি সিংহ বাস করিত। সে প্রতিদিন বহু পশু হত্যা করিত। একদিন অরণ্যের সকল পশু মিলিত হইয়া তাহার কাছে উপস্থিত হইয়া বলিল, 'প্রভু! সকল পশু বধ করিবার কি প্রয়োজন? মাত্র একটি পশুর দ্বারাই আপনার ভোজন হইতে পারে'।

There lived a lion named Bhāsuraka in a forest. Every day he used to kill many animals. One day all the animals of the forest approached him and said, 'Oh Lord ! What is the use of killing all the animals ? You can have your meal with one animal only'.

15. सरलसंस्कृतभाषया देवनागरीलिप्या च एकः प्रबन्धः लेख्यः — $10 \times 1$

(*a*) भारतीयसंस्कृतिः ।

(*b*) कश्चित् महापुरुषः ।

(*c*) उपमा कालिदासस्य ।

---